भारतवर्षीयः स्वनामख्यातो गिरिः “भारतेऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवः इत्युपक्रमे “सह्यो देवगिरिऋष्यमूकः श्रीशैलः” भाग० ५।१९।१७ उक्तेः श्रीरागस्य २रागिणीविशेषे स्त्री ङीप् देवगान्धारीशब्दे दृश्यम् ।

**देवगुरु** पु० ६त०। १सुराचार्य्ये बृहस्पतौ हेमच० देवानां पितरि २कश्यपे च “अपश्यन् कश्यपं तत्र मुनिं दीप्तं तपोनिधिम् । आद्यं देवगुरुं देवम्” हरिवं० २५७ अ०

**देवगुही** स्त्री गुह–बा० कि ङीप् देववत् गुही गुह्या । सरस्वत्याम् “देवगुह्यां सरस्वत्यां सार्वभौम इति प्रभुः” भाग० ८।१३।८।

**देवगुह्य** त्रि० ६त० । देवानामतिरहस्ये । “एकमासीनमेकान्ते देवगुह्यधरं प्रभुम्” हरिवं० ११६ अ० “श्रुतार्थो देवगुह्यस्य भवान् यत्र वयं स्थिताः” तत्रैवाध्याये “तस्मिन् भ्रातृणां विग्रहे देवगुह्ये” भा० आ० १अ० २मरणे न० । शब्दार्थचि० । तद्धि प्राणिनां वैराग्यानुत्पादाय देवैर्गोप्यते इति तस्य तथात्वम् ।

**देवगृह** न० ६त० । देवालये तल्लक्षणं गरुडपु० ४७अ० यथा “चतुःषष्टिपदं कृत्वा दिग्विदिक्षूपलक्षितम् । चतुष्कोणं चतुर्भित्ति द्वाराणि सूर्य्यसंख्यया । चत्वारिंशाष्टभिश्चैव भित्तीनां कल्पना भवेत् । ऊर्द्ध्वक्षेत्रसमा जङ्घा जङ्घार्द्धद्विगुणं भवेत् । गर्भविस्तारविस्तीर्णा शूकाग्रा च विधीयते । तत्त्रिभागेण कर्त्तव्या पञ्चभागेन वा पुनः । निर्गमस्तु शुकाघ्राया उच्छ्रयः शिखरार्द्धतः। चतुर्धा शिखरं कृत्वा त्रिभागे वेदिबन्धनम् । चतुर्थे पुनरस्यैव कण्ठस्य मलसारकम् । अथ वापि समं वास्तुं कृत्वा षोडशभागिकम् । तस्य मध्ये चतुर्भागमादौ गर्भन्तु कारयेत् । भागद्वादशकां भित्तिं ततस्तु परिकल्पयेत् । चतुर्भागेण भित्तीनामुच्छ्रयः स्यात् प्रमाणतः । द्विगुणः शिखरोच्छ्रायो भित्त्युच्छ्रायाच्च मानतः । शिखरार्द्धस्य चार्द्धेन विधेयास्तु प्रदक्षिणाः । चतुर्दिक्षु तथा ज्ञेयो निर्गमस्तु तथा बुधैः । पञ्चभागेन संभज्य गर्भमानं विचक्षणः । भागमेकं गृहीत्वा तु निर्गमं कल्पयेत् पुनः । गर्भसूत्रसमो भागादग्रतो मुखमण्डपः । एतत् सामान्यमुद्दिष्टं प्रासादस्य हि लक्षणम् । लिङ्गमानमथो वक्ष्ये पीठो लिङ्गसमो भवेत् । द्विगुणेन भवेद्गर्भः समन्ताच्छौनक ! ध्रुवम् । तद्विधा च भवेद्भित्तिर्जङ्घा तद्विस्तरार्द्धगा । द्विगुणं शिखरं प्रोक्तं जङ्घायाश्चैव शौनक ! । पीठं गर्भावरं कुर्य्यात् तन्मानेन शुकाग्रकाम् । निर्गमस्तु समाख्यातः शेषं सूत्रवदेव तु । लिङ्गमानं स्मृतं ह्येतद् द्वारमानमथोच्यते । कराग्रं वेदवत् कृत्वा द्वारं भागाष्टकं भवेत् । विस्तरेण समाख्यातं द्विगुणं चोच्छ्रया भवेत् । द्वारवत् पीठमध्ये तु शेषं शुषिरकं भवेत् । पादिकं शेषिकं भित्तिर्द्वारार्द्धेन परिग्रहात् । तद्विस्तारसमा जङ्घा शिखरं द्विगुणं भवेत् । शुकाग्रा पूर्ववज्ज्ञेया निर्गमोच्छ्रायकं भवेत् । मण्डपे मानमेतत्तु स्वरूपञ्चापरं वदे । त्वैवेदं कारयेत् क्षेत्रं यत्र तिष्ठन्ति देवताः । इत्थं कृतेन मानेन बाह्यभागविनिर्गतम् । नेमिः पादेन विस्तीर्णा प्रासादस्य समन्ततः । गर्भन्तु द्विगुणं कुर्य्यात् नेम्यामानं भवेदिह । स एव भित्तेरुत्सेधो द्विगुणः शिखरो मतः । प्रासादानाञ्च वक्ष्यामि मानं योनिञ्च नामतः । वैराजः पुष्पकाख्यश्च कैलासो मालकाह्वयः । त्रिपिष्टः पञ्च पञ्चैते प्रासादाः सर्व्वयोनयः । प्रथमश्चतुरस्रो हि द्वितीयस्तु तदायतः । वृत्तो वृत्तायतश्चान्योऽष्टास्रश्चेह च पञ्चमः । एतेभ्य एव सम्भूताः प्रासादाः सुमनोहराः । सर्वप्रकृतिभूतेभ्यश्चत्वारिंशच्च पञ्च च । मेरुश्च मन्दरश्चैव विमानश्च तथाऽपरः । भद्रकः सर्वतोभद्रो ! रुचकोनन्दनस्तथा। नन्दिवर्द्धनसंज्ञश्च श्रीवत्सश्च नवेत्यमी । चतुरस्रात् समुद्भुता वैराजादिति गम्यताम् । वडभी गृहराजश्च शालागृहञ्च मन्दिरम । विशालश्च तथा ब्रह्ममन्दिरं भवनं तथा । उत्तम्भं शिविका वेश्म नवैते पुष्पकोद्भवाः । वलयो दुन्दुभिः पद्मो महापद्मस्तथाऽपरः । वर्द्धनोऽप्यन्य उष्णीष शङ्खश्च कलसस्तथा । खपूरवृक्षकाश्चान्यो वृत्ताः कैलाससम्भवाः । गजोऽथ वृषभो हंसो गरुडः सिंहनामकः । भूमुखो भूधरश्चैव श्रीजयः पृथिवीधरः । वृत्तायतसमुद्भूता नवैते मालकाह्वयात् । वज्रं चक्रं तथान्यच्च स्वस्तिकं वज्रसंज्ञितम् । चित्रस्वस्तिकखड्गौ च गदा श्रीवृक्ष एव च । विजयो नामतश्चैते त्रिपिष्टपसमुद्भवाः । त्रिकोणपद्मअर्द्धेन्दु चतुष्कोणं द्विरष्टकम् । यत्र तत्र विधातव्यं संस्थानं मण्डपस्य तु । राज्यञ्च विजयश्चैवमायुर्वर्द्धनमेव च । पुत्रलाभः स्त्रियः पुष्टिस्त्रिकोणादिक्रमाद्भवेत् । कुर्य्यात् ध्वजादिसंख्यां वा द्वारि गर्भगृहन्तथा । मण्डपः सप्तसंख्याभिर्गुणितः सूत्रतस्तथा । मण्डपस्य चतुर्थांशाद्भद्रः कार्यो विजानता । स्वक्षीगवाक्षकोपेतो निर्गवाक्षोऽथ वा भवेत् । सार्द्धभित्तिप्रमाणेन भित्तिमाने-